*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[10]**

1. आकूतिः शब्दस्य किम् अर्थम्?

(A) मनः (B) हृदयः (C) शान्तिः (D) संकल्पः

**उत्तर :** (D) संकल्पः

2. क्रीडोत्सवः कुत्र आयोजितः?

(A) विद्यालये (B) क्षेत्रे (C) उद्याने (D) गृहे

**उत्तर:** (A) विद्यालये

3. जनानाम् हृदयानि कीदृशानि सन्तु?

(A) विषमाः (B) उदासीना (C) समाना (D) असमाना

**उत्तर :** (C) समाना

4. मनः कीदृशः भवतु?

(A) वैमनस्य पूर्णम् (B) द्वेषभाव पूर्णम् (C) सौमनस्य पूर्णम् (D) वर्गभेदस्य पूर्णम्

**उत्तर :** (C) सौमनस्य पूर्णम्

5. विपक्षी दले किम् नासीत्?

(A) मनोभेदः (B) द्वेषभावः (C) सम्यक् सामञ्जस्यम् (D) असहयोगम्

**उत्तर :** (C) सम्यक् सामञ्जस्यम्

6. विश्वस्य-प्राचीनतम-साहित्य रूपेण काः मन्यन्ते?

(A) पुराणाः (B) उपनिषदाः (C) वेदान्ताः (D) वेदाः

**उत्तर :** (D) वेदाः

7. वेदस्य ऋषिः कः अस्ति?

(A) चरकः (B) आङ्गिरसः (C) मनुः (D) भर्तृहरिः

**उत्तर :** (B) आङ्गिरसः

8. संगच्छध्वम् अर्थम् किम्?

(A) मिलित्वा वदत (B) मिलित्वा गायत (C) मिलित्वा गच्छत (D) मिलित्वा धावत

**उत्तर :** (C) मिलित्वा गच्छत

9. संज्ञान-सूक्तस्य संदेशः कस्मात् वेदान् गृहीतः?

(A) सामवेदात् (B) ऋग्वेदात् (C) अथर्ववेदात् (D) यजुर्वेदात्

**उत्तर :** (B) ऋग्वेदात्

10. समवेत स्वरेण - किम् अर्थम्?

(A) सम्मिलित स्वरेण (B) एकाकी स्वरेण (C) युष्माकम् स्वरेण (D) लोकभाषाया स्वरेण

**उत्तर:** (A) सम्मिलित स्वरेण

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[10]**

11. विजय प्राप्त्यर्थम् __________ आवश्यकम् अस्ति । (परस्परम् मनोभेदः / परस्परम् सामञ्जस्यम्)

**उत्तर :** परस्परम् सामञ्जस्यम्

12. आचार्य ! __________ वेदात् गृहीतः एष सन्देशः? । (अस्मात् / कस्मात्)

**उत्तर :** कस्मात्

13. पादत्राणम् __________ स्थापयित्वा प्रार्थनासभायाम् समुपस्थितः भवेत्। (बहिः / अन्तरे)

**उत्तर :** बहिः

14. वेदाः साक्षात् __________ निःसृताः। (ब्रह्ममुखात् / आचार्य संहितात्)

**उत्तर :** ब्रह्ममुखात्

15. __________ संवदध्वम् अभ्युदयम् साधयत। (संगच्छध्वम् / सम् मनोभेदम्)

**उत्तर :** संगच्छध्वम्

16. सृष्टि निर्माणं साफल्यार्थम् स्वं-स्वं __________ स्वीकृत्य स्व-स्वं कर्म निरवहन्। (कर्त्तव्यम् / अकर्त्तव्यम्)

**उत्तर :** कर्त्तव्यम्

17. देवाभागं यथापूर्वे संजानाना __________ । (उपासते / साधयते)

**उत्तर :** उपासते

18. वेदमन्त्राणाम् उच्चारणम् __________ मीलयित्वा, एकाग्रचितेन कुरुत। (नेत्रे / कर्णौ)

**उत्तर :** नेत्रे

19. समानं समितिः __________ मनः समानं चितं सह (अस्तु)। (समानी / विमानी)

**उत्तर :** समानी

20. प्रतिद्वन्द्विनः __________ पराजिताः । (द्वेषभावेन / मैत्रीभावेन)

**उत्तर :** मैत्रीभावेन

*** स्तम्भयोः मेलनं कुरुत।** **[12]**

| शब्दाः | अर्थाः |
|---|---|
| 21. उपासते | (i) प्रार्थनापूर्वकेण समर्पणेन |
| 22. हविषा | (ii) सेवन्ते |
| 23. वः | (iii) संस्कृत्य प्रचारयामि |
| 24. अभिमन्त्रये | (iv) युष्मभ्यम् |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. उपासते | (ii) सेवन्ते |
| 2. हविषा | (i) प्रार्थनापूर्वकेण समर्पणेन |

| | |
|---|---|
| 3. वः | (iv) युष्मभ्यम् |
| 4. अभिमन्त्रये | (iii) संस्कृत्य प्रचारयामि |

| शब्दाः | अर्थाः |
|---|---|
| 25. अभ्युदयम् | (i) मूलमन्त्र पाठः |
| 26. संहिता | (ii) अभिवृद्धिः |
| 27. संवदध्वम् | (iii) सम्मिलित-स्वरेण |
| 28. समवेत स्वरेण | (iv) एकस्वरेण वदत |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. अभ्युदयम् | (ii) अभिवृद्धिः |
| 2. संहिता | (i) मूलमन्त्र पाठः |
| 3. संवदध्वम् | (iv) एकस्वरेण वदत |
| 4. समवेत स्वरेण | (iii) सम्मिलित-स्वरेण |

| शब्दाः | अर्थाः |
|---|---|
| 29. संवदध्वम् | (i) सम्मिलित-स्वरेण |
| 30. समवेत स्वरेण | (ii) एकस्वरेण वदत |
| 31. संजानानाः | (iii) मिलित्वा गच्छत |
| 32. संगच्छध्वम् | (iv) एक मनसः भूत्वा |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. संवदध्वम् | (ii) एकस्वरेण वदत |
| 2. समवेत स्वरेण | (i) सम्मिलित-स्वरेण |
| 3. संजानानाः | (iv) एक मनसः भूत्वा |
| 4. संगच्छध्वम् | (iii) मिलित्वा गच्छत |

*** पूर्णवाक्येन उत्तरं लिखत।** **[24]**

33. अस्मिन् पाठे का प्रेरणा अस्ति?

**उत्तर :** अस्मिन् पाठे 'परस्परम् कार्याणि कृत्वा स्व-स्व कर्त्तव्यस्य सुचारु निर्वाहम् कुरुत' इति प्रेरणा अस्ति।

34. पादकन्दुक क्रीडायाम् क्रीडकाः कथम् विजयं प्राप्नुवन्तः?

**उत्तर :** पादकन्दुक क्रीडायाम् क्रीडकाः परस्परं सम्यक् सामञ्जस्येन विजयम् प्राप्नुवन्तः।

35. सङ्गच्छध्वं संवदध्वम् इत्यस्य कः अभिप्रायः?

**उत्तर :** सर्वे मिलित्वा गच्छत एकस्वरेण च वदन इत्यस्य अभिप्रायः।

36. सर्वे किं परित्यज्य ऐक्यभावेन जीवेयुः?

**उत्तर :** सर्वे वैमनस्यं परित्यज्य ऐक्य भावेन जीवेयुः।

37. सर्वेषां मनः कीदृशं भवेत्?

**उत्तर :** सर्वेषाम् मनः समानम् सौमनस्यपूर्णम् भवेत्।

38. "देवाभागं यथा पूर्वे संजानाना उपासते ।" भावार्थं लिखत।

**उत्तर :** यथा सृष्टेः प्रारम्भकाले ब्राह्मणा सृष्टाः अग्नि-वायु-आदित्यादयः ब्रह्माण्डीय-शक्त्यः सृष्टि निर्माण यज्ञस्य साफल्यार्थम् स्व-स्व कर्म निर्वहन्, तथैव मनुष्याः अपि स्वस्य कुटुम्बस्य, दलस्य लोकस्य च प्रगतये सुचारुरूपेण निर्वाहम् कुरुत।

39. "समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ।" अर्थम् स्पष्टम् कुरुत।

**उत्तर :** सर्वेषाम् चिन्तनं (मन्त्रः) समानः, परस्पर सौहार्दपूर्णम् भवेत्। अन्योन्य मन्त्रणम् संगठितं संकल्पं च दिव्य भावेन योजयित्वा प्रकटयामि, अतः ज्ञान-यज्ञम् सम्पादयामि।

40. सर्वे कीदृशं जीवनम् यापयेयुः?

**उत्तर :** सर्वे गृहे वर्गे, लोके च परस्परम् द्वेषं विना, सौमनस्य पूर्णम्, सुखेन सौहार्दपूर्णम् जीवनम् यापयेयुः।

41. केन कारणेन परिवारे समाजे ज्ञानप्राप्तिः आत्म-तृप्तिश्च भवति?

**उत्तर :** संगठित रूपेण स्वजीवने, लोके च प्रसन्नता, सौमनस्यम् उत्साहः आयुः, आरोग्यम्, विजयः, समृद्धिः धर्मः, ज्ञान-प्राप्ति, आत्म तृप्तिश्च भवति।

42. 'संगच्छध्वं संवदध्वम् सम वो मनांसिजानताम्'- किम् तात्पर्यम्?

**उत्तर :** सर्वे मनुष्याः स्वस्य परिवारे, गणे, समाजे,राष्ट्रे, विश्वे च मिलित्वा अग्रे गच्छत। परस्परं-सम्यक् विचारविनिमयम् कुर्वन्तः एकस्वरेण वदत। परस्परं मनोभावान् सम्यक् जानीत । परस्परं मनोभेदः मास्तु।

43. सर्वेषाम् आकूतिः हृदयानि च कीदृशानि सन्तु?

**उत्तर :** सर्वेषाम आकूतिः हृदयानि च समानी सन्तु । सामरस्य पूर्णानि सन्तु येन तेषाम् मनः सामञ्जस्यरूपम् च अस्तु।

44. "समानमस्तु वो मनो यथा वः सुसहासति" अर्थ स्पष्टं कुरुत।

**उत्तर :** वः (युष्माकम्) मनः सामञ्जस्य युतम् एकरूपम् च अस्तु । येन युष्माकम् संघटनं शोभनम् उत्कृष्टं च भवति तथा युष्माकम् मनः सामञ्जस्य युतम् एकरूपं च अस्तु।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[18]**

45. वेदाः अद्य विश्वस्य प्राचीनतम साहित्य-रूपेण <u>विद्वद्भिः</u> मन्यन्ते।

**उत्तर :** वेदाः अद्य विश्वस्य प्राचीनतम साहित्य-रूपेण कै मन्यन्ते?

46. वेदानाम् उच्चारणम् <u>एकाग्रचित्तेन</u> कुर्यात।

**उत्तर :** वेदानाम् उच्चारणम् कथम् कुर्यात?

47. <u>यूयम् सर्वे</u> सर्वत्र मिलित्वा अग्रे गच्छत, संभूय अभ्युदयं साधयत।

**उत्तर : के** सर्वत्र मिलित्वा अग्रे गच्छत, संभूय अभ्युदयं साधयत?

48. क्रीडकानाम् प्रतिद्वन्द्विनः परस्परम् <u>मनोभेद भावेन</u> पराजिताः।

**उत्तर :** क्रीडकानाम् प्रतिद्वन्द्विनः परस्परम् **केन** पराजिताः?

49. विजय प्राप्त्यर्थम् मिलित्वा कार्यकरणम्, एकता, परस्पर सामञ्जस्यम् च आवश्यकम्।

**उत्तर :** विजय प्राप्त्यर्थम् **किम्-किम्** आवश्यकम्?

50. संगच्छध्वं, संवदध्वं संदेशः ऋग्वेदात् गृहीतः।

**उत्तर :** संगच्छध्वं, संवदध्वं संदेशः कुत्रतः गृहीतः?

51. सृष्टि-निर्माण-यज्ञस्य साफल्यार्थम् स्वं स्वं कर्त्तव्यम् निर्वहन।

**उत्तर :** **कस्य** साफल्यार्थं स्वं स्वं कर्त्तव्यम् निर्वहन?

52. वैमनस्यम् परित्याज्य ऐक्यभावेन जीवत तथा सर्वे अभीष्ट फलानि च प्राप्नुत।

**उत्तर :** **किम्** परित्याज्य ऐक्यभावेन जीवत तथा सर्वे अभीष्ट फलानि च प्राप्नुत?

53. एकस्मिन् कर्मणि सह-प्रवृत्तानाम् परस्परं सौहार्दपूर्णम् भवतु।

**उत्तर :** एकस्मिन् कर्मणि सह-प्रवृत्तानाम् परस्परं **किम्** भवतु?

54. एतैः मन्त्रैः संघटितरूपेण सहजीवनस्य कृते प्रेरणा लभ्यते।

**उत्तर :** एतैः मन्त्रैः संघटितरूपेण **किम्** लभ्यते?

55. अयं पाठः ऋग्वेदात् सङ्कलितः।

**उत्तर :** अयं पाठः **कस्मात्** सङ्कलितः?

56. वयम् ईश्वरं नमामः।

**उत्तर :** वयम् **कम्** नमामः?

57. वयम् ऐक्यभावेन जीवामः।

**उत्तर :** वयम् **केन** जीवामः?

58. परमेश्वरः सर्वत्र व्याप्तः अस्ति।

**उत्तर :** **कः** सर्वत्र व्याप्तः अस्ति?

59. वेदस्य अपरं नाम श्रुतिः।

**उत्तर :** **कस्य** अपरं नाम श्रुतिः?

60. मन्त्राः वेदेषु भवन्ति।

**उत्तर :** मन्त्राः **कुत्र/केषु** भवन्ति?

61. ईश्वरस्य प्रार्थनया शान्तिः प्राप्यते।

**उत्तर :** **कस्य** प्रार्थनया शान्तिः प्राप्यते?

62. अहं समाजाय श्रमं करोमि।

**उत्तर :** अहं **कस्मै** श्रमं करोमि?

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत।** **[10]**

63. अभ्युदयम् - ____________

**उत्तर :** अभ्युदयम् - लौकिक उन्नति
वाक्यः - सर्वे परस्परं सम्यक् विचार-विनिमयं कुर्वन्तः अभ्युदयम् साधयत्।

64. उपासते - ____________

**उत्तर :** उपासते - श्रद्धापूर्वक कर्त्तव्य निर्वहन्
वाक्यः - ते परस्परं उत्कृष्ट-समन्वयपूर्वकम् उपासते।

65. देवाः - ____________

**उत्तर :** देवाः - सृष्टि की मूलभूत शक्तियाँ
वाक्यः - देवाः सृष्टि-निर्माण-यज्ञस्य साफल्यार्थम् स्व-स्वं कर्त्तव्यम्-स्वीकृताः।

66. समवेत-स्वरेण - ____________

**उत्तर :** समवेत-स्वरेण - सम्मिलित ध्वनि से
वाक्यः - मन्त्राणाम् उच्चारणम् समवेत-स्वरेण कर्त्तव्यम्।

67. आकूतिः - ____________

**उत्तर :** आकूतिः - संकल्प
वाक्यः - अस्माकम् आकूतिः समाना भवेत् येन आत्मतृप्तिः च भवेत्।

68. निरवहन् - ____________

**उत्तर :** निरवहन् - निर्वाह किया
वाक्यः - मनुष्याः अपि परस्परम् उत्कृष्ट समन्वयपूर्वकम् स्वं स्वं कर्म निरवहन्।

69. वः - ____________

**उत्तर :** वः - तुम्हारे
वाक्यः - वः लक्ष्यसिद्धि समाना भवतु, मनः च सौहार्दपूर्णम् भवतु।

70. हविषा - ____________

**उत्तर :** हविषा - प्रार्थनापूर्वक यज्ञाहुति द्वारा
वाक्यः - संघटितानाम् युष्माकं सामूहिक्या हविषा अहम् ज्ञानं यज्ञं सम्पादयामि।

71. मनांसि - ____________

**उत्तर :** मनांसि - मनों को
वाक्यः - युष्माकम् मनांसि सम्यक् जानीत, परस्परं मनोभेदः मास्तु।

72. मन्त्रः - ____________

**उत्तर :** मन्त्रः - चिन्तन
वाक्यः - सर्वेषाम् मानवानां मन्त्रः समानः अस्तु।

*** अधोलिखित पद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[28]**

73. प्राचीन-भारतीयज्ञान-परम्परायां 'वेदः साक्षात् ब्रह्ममुखनिःसृता पवित्रतमा दैवी वाक्' इति मन्यते। वेदस्य चत्वारः संहिताः सन्ति - ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः चेति। इमे वेदाः अद्य विश्वस्य प्राचीनतम-साहित्य-रूपेण विद्वद्भिः मन्यन्ते। भवन्तः सर्वे स्नात्वा, शुद्धवस्त्राणि परिधाय, पादत्राणं बहिः स्थापयित्वा, अस्यां प्रार्थनासभायां समुपस्थिताः सन्ति। अतः आगच्छन्तु, प्रणामाञ्जलिं कृत्वा, नेत्रे मीलयित्वा, एकाग्रचित्तेन, समवेतस्वरेण च वेदमन्त्राणाम् उच्चारणं कुर्मः -

I. एकपदेन उत्तरत -

(i) पादत्राणं कुत्र स्थापयितव्यम्?

(ii) छात्राः कुत्र समुपस्थिताः सन्ति?

II. पूर्णवाक्येन उत्तरत -

प्राचीन-भारतीय-ज्ञान परम्परायाम् वेदः किम् मन्यते?

III. निर्देशानुसारम् उत्तरत -

(i) वेदस्य कति: संहिताः सन्ति?

(अ) एक: (ब) त्रय: (स) चत्वार: (द) पंचम:

(ii) समवेत स्वरेण केषाम् उच्चारणं कृतम्?

(अ) वेदानाम् (ब) वेदमन्त्राणाम् (स) शुद्धवस्त्राणाम् (द) परम्पराणाम्

(iii) समवेत-स्वरेण अर्थं किम्?

(अ) एक स्वरेण (ब) अनेकैः स्वरै:

(स) सम्मिलित-स्वरेण (द) स्फुटित स्वरेण

**उत्तर :** I. (i) बहि:

(ii) प्रार्थनासभायाम्

II. प्राचीन भारतीय ज्ञान-परम्परायां वेदः साक्षात् ब्रह्ममुख निःसृता पवित्रतमा दैवी वाक् इति मन्यते।

III. (i) (स) चत्वार:

(ii) (ब) वेदमन्त्राणाम्

(iii) (स) सम्मिलित-स्वरेण

74. समानी व आकूति: समाना हृदयानि व:।

समानमस्तु वो मनो यथा व: सुसहासति ॥३॥

I. एकपदेन उत्तरत -

(i) युष्माकम् किम् समानम् अस्तु?

(ii) युष्माकम् हृदयानि कीदृशानि सन्तु?

II. पूर्णवाक्येन उत्तरत -

एतैः मन्त्रैः मानवाः किम् लभ्यन्ते?

III. निर्देशानुसारम् उत्तरत -

(i) आकूति: शब्दस्य अर्थ: अस्ति -

(अ) सामरस्यपूर्णानि (ब) समाना हृदयानि (स) सङ्कल्प: (द) एकरूपम्

(ii) एतै: मन्त्रै: राष्ट्रे विश्वे च किम् विराजते?

(अ) वैमनस्य भाव: (ब) दुर्भाव: (स) क्रोध: (द) मैत्रीभाव:

(iii) ज्ञान-प्राप्ति: आत्मतृप्तिश्च केन प्राप्यते?

(अ) वैमनस्य भावेन (ब) संगठन-सूक्तेन

(स) निकृष्ट भावेन (द) असमानेन हृदयेन

**उत्तर :** I. (i) सङ्कल्पम्

(ii) सामरस्यपूर्णानि

II. एतैः मन्त्रैः मानवाः संगठितरूपेण सहजीवनस्य कृते प्रेरणा लभ्यन्ते।

III. (i) (स) सङ्कल्प:

(ii) (द) मैत्रीभाव:

(iii) (ब) संगठन-सूक्तेन

75. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

देवा भागं यथा पूर्वे संजानाना उपासते ॥१॥

I. एकपदेन उत्तरत -

(i) का: संगच्छध्वम् संवदध्वम् च?
(ii) परस्परम् किम् मास्तु?
II. पूर्णवाक्येन उत्तरत -
सर्वे किमर्थम् संगच्छध्वम्?
III. निर्देशानुसारम् उत्तरत -
(i) वेदस्य ऋषिः केन मनुष्यान् उपदिशति?
(अ) ज्ञानेन (ब) एकस्वरेण (स) स्व-कर्त्तव्येन (द) परमेश्वरस्य-संदेशेन
(ii) मनुष्याः किम् परित्यज्य ऐक्यभावेन जीवत?
(अ) कर्त्तव्यम् (ब) स्व-स्व कर्माणि (स) देवान् (द) वैमनस्यम्
(iii) परस्परं सम्यक् ______ कुर्वन्तः एकस्वरेण वदत। (रिक्तस्थान पूरयत )
(अ) मनोकार्यान् (ब) विचार-विनिमयम् (स) मनोभेदम् (द) वैमनस्यम्

**उत्तर :** I. (i) मानवा:
(ii) मनोभेद:
II. सर्वे स्वस्वपरिवारे, गणे, समाजे, राष्ट्रे, विश्वे च मिलित्वा संभूयः अभ्युदयम् साधयत।
III. (i) (द) परमेश्वरस्य-संदेशेन
(ii) (द) वैमनस्यम्
(iii) (ब) विचार-विनिमयम्

76. समानो मन्त्र: समिति: समानी समानं मन: सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये व: समानेन वो हविषा जुहोमि ॥२॥
I. एकपदेन उत्तरत -
(i) सर्वेषाम् चिन्तनम् कीदृशम् भवतु?
(ii) मनः च कीदृशं अस्तु?
II. पूर्णवाक्येन उत्तरत -
सर्वे परस्परं कीदृशं जीवनं यापयेयु:?
III. निर्देशानुसारम् उत्तरत -
(i) समानेन व: किम् अभिमन्त्रये हविषा जुहोमि?
(अ) तन्त्रम् (ब) यन्त्रम् (स) मन्त्रम् (द) शस्त्रम्
(ii) के सर्वदा मन्त्रणां संकल्पं च दिव्य भावेन योजयन्ति?
(अ) ऋषयः महात्मनः च (ब) कवय: लेखक: च
(स) पत्नी-पतिः च (द) पशव: पक्षय: च
(iii) लक्ष्यसिद्धि: कीदृशा भवतु?
(अ) असमान्ना (ब) समाना (स) लघु (द) दीर्घा:

**उत्तर :** I. (i) समानम्
(ii) समानम्
II. गृहे, वर्णे, लोके च सर्वे परस्परं द्वेष विना सुखेन सौहार्दपूणँ जीवनम् यापयेयुः।
III. (i) (स) मन्त्रम्
(ii) (अ) ऋषयः महात्मनः च
(iii) (ब) समाना

----- -----